यत्र गुरु प्रकटस्वरराग
तत् कथितं तव दोधकवृत्तम् ॥"

दोधयमानः त्रि, (पुनः पुनरतिशयेन वा धूयते। धु कम्पने + "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्।" ३।१।२२। इति यङ्। "गुणो यङ्लुकोः।" ७।४।८२। इति अभ्यासस्य गुणः। ततः अभ्यासस्त्वादनुसारेण दोधूयधातुः। यङन्तत्वादात्मनेपदम्। ततः शानच्।) पुनःपुनरतिशयेन वा कम्पविशिष्टः। यथा,—

"नभस्वदासङ्गभयेव साध्वी
दोधयमाना वडभीपताका।"
इति छन्दोमञ्जरी ॥

"प्रलयेऽपि दोधूयमानाः परमाणवः तिष्ठन्ति।"
इति शिरोमणिः ॥

दोरकः पुं, (डोरक + निपातनात् डस्य दः।) वीणातन्तुबन्धनरज्जुः। इति शब्दार्थकल्पतरुः ॥

दोर्गडुः, पुं, (दोषा बाहुना गडुः कुण्ठितः।) कुण्ठितहस्तः। तत्पर्य्यायः। कुन्यः २ बाहुकुण्ठः ३। इति जटाधरः ॥

दोर्ग्रहः, त्रि, (दोर्गृह्यते अनेनेति। ग्रह + करणे घञ्।) बलवान्। तत्पर्य्यायः। कैरातः २ चामः ३। इति हारावली। १२७ ॥ (दोष्णो ग्रहः।) भुजस्य ग्रहणं तस्य यथा च ॥

दोर्दण्डः, पुं, (दोर्दण्ड इव।) बाहुरूपदण्डः। यथा। "दोर्दण्डेन समो न चास्ति भुवने प्रत्यक्षविष्णुः स्वयम्।" इत्युद्भटः ॥

दोर्मध्यं, क्ली, (दोष्णो मध्यम्।) बाहुमध्यभागः। इति शब्दार्थकल्पतरुः ॥ बाजु इति भाषा ॥

दोर्मूलं, क्ली, (दोषो मूलम्।) कक्षः। बगल इति भाषा। तत्पर्य्यायः। भुजकोटरः २ खण्डिकः ३ कचा ४। इति हेमचन्द्रः। ३। २५३ ॥

दोलः, पुं. दोलनम्। दुलधातोर्भावे घञ्प्रत्ययेन निष्पन्नः। (दोल्यते अस्मिन् कृष्णेनेति। दोलि + अधिकरणे घञ्।) श्रीकृष्णस्य यात्राविशेषः। अस्य प्रमाणं यथा, पाद्मे पातालखण्डे।

"विशेषतः कलियुगे दोलोत्सवो विधीयते।
फाल्गुने च चतुर्द्दश्यामष्टमे यामसंज्ञके ॥
अथवा पौर्णमास्यान्तु प्रतिपत्सन्धिसम्मितौ।
पूजयेद्विधिवद्भक्त्या फल्गुचूर्णैश्चतुर्विधैः ॥
सितरक्तैर्गौरपीतैः कर्पूरादिविमिश्रितैः।
हरिद्राचारयोगाच्च रङ्गरम्यैर्मनोहरैः ॥
अन्यैर्व्वा रङ्गरम्यैश्च प्रीणयेत् परमेश्वरम्।
एकादश्यां समारभ्य पञ्चम्यन्तं समापयेत् ॥
पञ्चाहानि त्र्यहाणि स्युर्दोलोत्सवो विधीयते।
दक्षिणाभिमुखं कृष्णं दोलयानं सकृन्नराः ॥
दृष्ट्वापराधनिचयैर्मुक्तास्ते नात्र संशयः ॥"
अपि च।

जैमिनिरुवाच।

"फाल्गुने मासि कुर्व्वीत दोलारोहणमुत्तमम्।
यत्र क्रीडति गोविन्दो लोकानुग्रहणाय वै ॥
प्रत्यर्चां देवदेवस्य गोविन्दाख्यान्तु कारयेत्।
प्रासादं पुरतः कुर्य्यात् षोडशस्तम्भसुच्छ्रितम् ॥
चतुरस्रं चतुर्द्वारं मण्डपं वेदिकान्वितम्।
चारुचन्द्रातपं माल्यचामरध्वजशोभितम् ॥
भद्रासनं वेदिकायां श्रीपर्णीकाष्ठनिर्म्मितम्।
फल्गूत्सवं प्रकुर्व्वीत पञ्चाहानि त्र्यहाणि वा ॥
फाल्गुन्याः पूर्व्वतो विप्राश्चतुर्द्दश्यां निशामुखे।
वह्न्युत्सवं प्रकुर्व्वीत दोलमण्डपपूर्व्वतः ॥
एतत् सर्व्वं प्रकुर्व्वीत दोलमण्डपपूर्व्वतः।
गोविन्दानुग्रहीतन्तु यात्राङ्गं तत् प्रकीर्त्तितम् ॥
आचार्य्यवरणं कृत्वा वह्निं निर्म्मथनोद्भवम्।
भूमिं संस्कृत्य विधिवत् तृणराशिं महोच्छ्रितम् ॥
सपर्णं कारयित्वा तु वह्निं तत्र विनिःक्षिपेत्।
पूजयित्वा विधानेन कुष्माण्डविधिना हुनेत् ॥
गोविन्दं पूजयित्वा तु भ्रामयेत् सप्त तं विभुम्।
तस्मिन् काले हरिं दृष्ट्वा सर्व्वपापैः प्रमुच्यते ॥
यत्नात्तं रक्षयेद्वह्निं यावद्यात्रा समाप्यते ॥*॥
प्रान्तयामे चतुर्द्दश्यां गोविन्दप्रतिमां शुभाम् ॥
वासयित्वा हरेरग्रे पूजयेत् पुरुषोत्तमम्।
उपचारावशिष्टैस्तु प्रत्यर्चामपि पूजयेत् ॥
ततो वरञ्च वसनं मालाञ्च द्विजसत्तमाः।
अर्च्चायां विन्यसेन्मन्त्रं परं ज्योतिर्विभावयन् ॥
ततश्च प्रतिमा साक्षात् जायते पुरुषोत्तमः।
रत्नान्दोलिकया तां वै नयेत् स्नानस्य मण्डपम् ॥
नानातूर्य्यनिनादैश्च शङ्खध्वनिपुरःसरम्।
जयशब्दैस्तथा स्तोत्रैः पुष्पवृष्टिभिरेव च ॥
छत्रध्वजपताकाभिश्चामरव्यजनैस्तथा।
निरन्तरं दीपिकाभिस्तथा कुर्य्यान्महोत्सवम् ॥
आगच्छन्ति तदा देवाः पितामहपुरोगमाः।
द्रष्टुम्मुषिगणैः सार्द्धं गोविन्दस्य महोत्सवम् ॥
भद्रासनेऽधिवास्यैनं पूजयेदुपचारकैः ॥
महास्नानस्य विधिना स्नपनं तस्य कारयेत्।
पञ्चामृतैश्च सर्व्वैर्वै तेषामन्यतमेन वा।
स्नानान्ते गन्धतोयेन श्रीसूक्तेनाभिषेचयेत् ॥
संप्रोक्ष्य भूषयेद्देवं वस्त्रालङ्कारमाल्यकैः।
नीराजयित्वा संपूज्य प्रासादं परिवेष्टयेत् ॥
सप्तकृत्वस्ततो देवं दोलमण्डपमानयेत्।
सुसंस्कृतायां रथ्यायां पताकातोरणादिभिः ॥
अधोदेशे मण्डपं तं सप्तशो भ्रामयेत्ततः।
ऊर्द्ध्वदेशे पुनः सप्तस्तम्भवेद्यान्तु सप्त वै ॥
यात्रावसाने च पुनर्भ्रामयेदेकविंशतिम्।
इयं लीला भगवतः पितामहमुखेरिता ॥
राजर्षिणेन्द्रद्युम्नेन कारिता पूर्व्वमेव हि।
फलपुष्पावनम्रैश्च शाखाभिः परिकल्पिते ॥
वृन्दावनान्तरे रम्ये मत्तसारसवारिणि।
कोकिलारावमधुरे नानापक्षिगणाकुले ॥
नानोपशोभारचिते कालागुरुसुधूपिते।
प्रफुल्लकेतकीषण्डगन्धामोदि-दिगन्तरे ॥
मल्लिकाशोकपुन्नागचम्पकैरुपशोभिते।
तत्काननान्तर्घटिते मण्डपे चारुतोरणे ॥
भूषिते माल्यवसनचामरैरुपशोभिते।
रत्नखट्वान्दोलिकायां तन्मध्ये वासयेत् प्रभुम् ॥
अनर्घरत्नघटितकुण्डलोद्भासितश्रुतिम्।
यथास्थानं यथाशोभं दिव्यालङ्काररञ्जनम् ॥
विकचाम्बुजमध्यस्थं विश्वधात्र्या श्रिया युतम्।
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ॥
सुप्रसन्नं सुनासाभ्रूपीनवक्षःस्थलोज्ज्वलम्।
पुरो व्योमस्थितैर्द्देवैर्ब्रह्माद्यैर्नतकन्धरैः ॥
कृताञ्जलिपुटैर्भक्त्या जयशब्दैरभिष्टुतम्।
गन्धर्व्वैरप्सरोभिश्च किन्नरैः सिद्धचारणैः ॥
हाहाहूहूप्रभृतिभिः सत्वरं दिव्यगायनैः।
अहंपूर्व्विकया नृत्यगीतवाद्यित्रकारिभिः ॥
नेत्राम्बुजसहस्रैश्च पूज्यमानं मुदान्वितैः।
विकिरद्भिः सर्व्वदिक्षु गन्धचन्दनजं रजः ॥
उपवेश्याथ गोविन्दं पूजयेदुपचारकैः।
वल्लवीवृन्दमध्यस्थं कदम्बतरुमूलगम् ॥
हावहास्यविलासैश्च क्रीडमानं वनान्तरे।
गोपीभिश्चैव गोपालैर्लीलान्दोलिकया नगम् ॥
चिन्तयित्वा जगन्नाथं विकिरेद्गन्धचूर्णकैः।
सकर्पूरै रक्तपीतशुक्लैर्दिक्षु समन्ततः ॥
दिव्यैर्वस्त्रैर्दिव्यमाल्यैर्दिव्यगन्धैः सुधूपकैः।
चामरान्दोलनैर्गानैः स्तुतिभिश्च समर्च्चितम् ॥
आन्दोलयेत् दोलिकास्थं सप्तवारान् शनैः शनैः।
तदा पश्यन्ति ये कृष्णं मुक्तिस्तेषां न संशयः ॥
ब्रह्महत्यादिपापानां पञ्चानां संक्षयो भवेत्।
त्रिवारं दोलयेद्देवं सर्व्वपापापनोदनम् ॥
भक्तानुग्राहकं पुंसां भुक्तिमुक्त्येककारणम्।
लीलाविचेष्टितं यस्य कृत्रिमं सहजं यथा ॥
अंहःसंघक्षयकरं मूलाविद्यानिवर्त्तकम्।
पश्यन् द्वितीयं हरति गोहत्याद्युपपातकम् ॥
क्षिणोत्यशेषपापानि तृतीयं नात्र संशयः।
दृष्ट्वा दोलास्थितं देवं सर्व्वपापैः प्रमुच्यते ॥
आध्यात्मिकैराधिदैवैराधिभूतैर्व्विमुच्यते।
इमां यात्रां कारयित्वा चक्रवर्त्ती भवेन्नृपः ॥
ब्राह्मणस्तु चतुर्वेदी ज्ञानवान् जायते ध्रुवम् ॥"
इति स्कान्दे उत्कलखण्डे ४२ अध्यायः ॥*॥

तस्य संक्षेपव्यवस्था यथा,—यदा अरुणोदयकाले पौर्णमासीलाभस्तत्रैव दोलयात्रा। उभयदिने अरुणोदयकाले पौर्णमासीलाभे पूर्व्वदिने। सङ्गवमध्याह्नकालव्यापित्वात् त्रिसन्ध्यव्यापित्वेन तिथेर्ब्बलवत्त्वाच्च। यदा तिथिक्षयवशादरुणोदयकाले न पौर्णमासीलाभस्तदा कदाचित् सहायभावेन चतुर्द्दश्यादरः। एतेन पूर्व्वदिने अरुणोदयं विना पूर्व्वाह्णे पौर्णमासीलाभः परदिने मुहूर्त्तान्न्यूनतिथिलाभस्तदा फल्गूत्सवः पूर्व्वदिने युग्मवचनानुरोधादिति निरस्तम्। उभयदिने कर्म्मयोग्यप्रशस्तकालप्राप्ततिथिसन्देह एव युग्मवचनप्रवृत्तेः। एवं पञ्चमीपर्य्यन्तासु तिथिषु तत्करणे अनयैव दिशा व्यवस्थोन्नेयेति। इति दोलयात्रातत्त्वम् ॥*॥

चैत्रे मासि दोलस्य प्रमाणं गारुडे।
"चैत्रे मासि सिते पक्षे दक्षिणाभिमुखं हरिम्।
दोलारूढं समभ्यर्च्य मासमान्दोलयेत् कलौ ॥"
तन्नित्यता च पद्मपुराणे।
"ऊर्ज्जे रथं मधौ दोलां श्रावणे तन्तु पर्व्व च।
चैत्रे मदनकारोपमकुर्व्वाणो व्रजत्यधः ॥